# Parivardhita MAngala Ashtakam

# परिवर्धितमङ्गलाष्टकम्

## Document Information

Text title : Mangala Ashtakam 3

File name : mangalAShTakam3.itx

Category : deities_misc, mangala, aShTaka

Location : doc_deities_misc

Description/comments : This is extended version of mangalAShTakam2

Latest update : March 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# परिवर्धितमङ्गलाष्टकम्

हेरम्बः सुरपूजितो गुणमयो लम्बोदरः श्रीयुतः
श्रीशुण्डो गजकर्णको गजमुखो गम्भीरविद्यागुणी ।
गौर्याः पुत्रगणेश्वरो हरसुतो गोविन्दपूजाकृतो
यात्राजन्म-विवाहकार्यसमये कुर्यात्सदा मङ्गलम् ॥ १॥

श्रीमत्पङ्कजविष्टरो हरिहरौ वायुर्महेन्द्रोऽनल-
श्चन्द्रो भास्करवित्तपालवरुण-प्रेताधिपो नैरृतिः ।
प्रद्युम्नो नलकूबरः सुरगजश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लाङ्गलधरः कुर्वन्तु नो मङ्गलम् ॥ २॥

गङ्गागोमति-गोपतिर्गणपति-गोविन्दगोवर्धनो
गीता-गोमय-गौरिजो-गिरिसुता-गङ्गाधरो गौतमः ।
गायत्री गरुडो गदाधरगया गम्भीरगोदावरी
गन्धर्वग्रहगोपगोकुलगणाः कुर्वन्तु नो मङ्गलम् ॥ ३॥

नेत्राणां त्रितयं शिवं पशुपतिमग्नित्रयं पावनं
यत्तद्विष्णुपदत्रयं त्रिभुवनं ख्यातं च रामत्रयम् ।
गगावाहपथ त्रयं सुविमलं वेदत्रयं ब्राह्मणं
सन्ध्यानां त्रितयं द्विजैरपि युतं कुर्वन्तु नो मङ्गलम् ॥ ४॥

वाल्मीकिः सनकः सनन्दनमुनिर्व्यासो वसिष्ठो भृगु-
र्जाबालिर्जमदग्निरापजनका गर्गागिरोगौतमाः ।
मान्धाता भरतो नपश्च सगरो जन्यो दिलोपो नृपः
पुण्यो धर्मसुतो ययाति-नहुषः कुर्वन्तु नो मङ्गलम् ॥ ५॥

गौरी श्रीरदितिः सपर्णजननी कद्रुमहेन्द्रप्रिया
सावित्री च सरस्वती च सुरभिः सत्यव्रताऽरुन्धती ।
सत्या जाम्बवती च रुक्मभगिनी स्वाहा पितॄणां प्रिया
वेला पाम्बुनिधेः समीनमकराः कुर्वन्तु नो मङ्गलम् ॥ ६॥

शेषस्तक्षककालकूटकुमुदाः पद्मा तथा वासुकि-
    र्यः कर्कोटकशङ्खपद्मक इति ख्याताश्च ये पन्नगाः ।
अन्ये काननगह्वरेषु जलधौ ये चान्तरिक्षस्थिता-
    स्ते प्रातः स्मरणेन च प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥ ७॥

गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
    कावेरी सरयू महेन्द्रतनया चर्मण्वती वेणिका ।
क्षिप्रा वेत्रवती महासरनदी ख्याता गया गण्डकी
    पूर्णजलैः समुद्रसहिताः कुर्वन्तु नो मङ्गलम् ॥ ८॥

लक्ष्मीः कौस्तुभपारिजातकसुराज धन्वन्तरिश्चन्द्रमाः
    गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः ।
अश्वः सप्तमुखस्तथा हरिधनुः शङ्खो विषश्चामृतं
    रत्नानीह चतुर्दश प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥ ९॥

ब्रह्मज्ञानरसायनं श्रुतिकथा सद्वैद्यकं ज्योतिषं
    व्याकरणं च धनुर्धरं जलतरं मन्त्राक्षरं वैदिकम् ।
कोकं वाहनवाजिनं नटनृतं सम्बोधनं चातुरी
    विद्यानाम चतुर्दशप्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥ १०॥

ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यो ग्रहाणां पतिः
    शुक्रो देवपतिनलो नरपतिः स्कन्दश्च सेनापतिः ।
विष्णुर्यज्ञपतिर्यमः पितृपतिस्तारापतिश्चन्द्रमाः
    इत्येते पतयः सुपर्णसहिताः कुर्वन्तु नो मङ्गलम् ॥ ११॥

अश्वत्थो वटचन्दनौ सुरतरुर्मन्दारकल्पद्रुमौ
    जम्बू-निम्ब-कदम्ब चूतसरला वृक्षाश्च ये क्षीरिणः ।
स्वर्गे ये पारिजातकसुरा वैभाजिते राजिते
    रम्ये चैत्ररथे च नन्दनवने कुर्वन्तु नो मङ्गलम् ॥ १२॥

इति परिवर्धितमङ्गलाष्टकं सम्पूर्णम् ।

*Parivardhita MAngala Ashtakam*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*